आख्यातशक्तिवादविवृतिः

१३५५

आख्यात शक्तीवाद १११

आख्यात शकती वाद

२१०

श्रीगणेशाय नमः॥ कुंचिताधरपुटेन पूरयन् वंशिकां प्रचलदंगुलिं पर्किः। मोहयन्नखिलवामलोचनाः पातु कोपि नवनी
रदच्छविः॥१॥ श्रीमता मथुरानाथतर्कवागीशधीमता॥ आख्यातशक्ति[…]वादस्य विवृतिः क्रियते मया॥२॥ आख्या
तस्य शक्तिं निरूपयति॥ आख्यातस्येति॥ आख्यातं यल्लसावच्छिन्नशक्तताकमित्यर्थः॥ तेन वक्ष्यमाणहेतोर्नवैय
धिकरण्यं। आख्यातत्वं च संकेतविशेषसंबंधेनाख्यातपदवत्त्वं। न तु जातिः। तिबादिना सांकर्यात् मानाभा
वाच्च। शक्ततावच्छेदकं तु न तत्। किंतु प्रत्येकं तिबादिकमेव। अन्यथाख्यातत्वप्रकारेण ज्ञानदशायां कालाप
[redacted]व्याकरणानभिज्ञानां तिबादिज्ञानाच्छाब्दबोधमात्रे शक्तिभ्रमजन्यत्वप्रसंगात्। तिबा
दिप्रकारेण ज्ञानदशायां चाख्यातत्वप्रकारेण ज्ञानाच्छाब्दबोधानुदयस्य सर्वसिद्धत्वात्। यत्नत्वं च प्रवृत्तित्वं तच्च रागजन्यता च २
वच्छेदकतया सिद्धं। अहं यते अहं प्रवृत्तोस्मि अहं करोमीत्यनुव्यवसायसाक्षिको वा निवृत्तिजीवनयोनिवृत्त्यावृत्तो जा
तिविशेषः। निवृत्तिजीवनयोनि[…]यो रागाजन्यत्वात् तथानुव्यवसायविरहाच्च। चेष्टाजनकतावच्छेदकोपि स एवा॥ १
यत्न°

वृत्तिश्चेष्टाजनकत्वविरहात्। मुमुक्षोः शारीरकर्मण्येष्टात्वेन मानाभावात्। अत्रापि चेष्टात्वस्यानुभवसिद्धत्वे रागजन्यताव-
च्छेदकप्रवृत्तित्वव्यापको निवृत्तिव्यावृत्तो जीवनयोनि[illegible]साधारणो जातिविशेष एव चेष्टाजनकतावच्छेदकः। सच्च ना- भसत्र
ख्यातस्य शक्यतावच्छेदकः। तथा सत्याख्यातस्य कृधातोः पर्यायत्वानुपपत्तिः। मुमुक्षौ जीवनयोनियत्नेऽपि ख्यातस-
ककरोतिव्यवहाराभावेन रागजन्यतावच्छेदकप्रवृत्तित्वस्यैव कृधातुशक्यतावच्छेदकत्वात्। एतेन निवृत्ति जीवनयोनि-
यत्नसाधारणं गुणविभाजकं प्रयत्नत्वमेवाख्यातस्य शक्यतावच्छेदकं। न चैवं पाकादिकं कृत्रिमायामपि पचतीति प्र-
योगः स्यादिति वाच्यं। निवृत्तेः क्रियानुकूलत्वाभावात्। क्रियानिष्ठसाध्यतास्य विलक्षणविषयतानिरूपकत्वाच्च। तथा
च वलाराम सभयात्। आख्यातार्थयत्नधात्वर्थयोस्तादृशसंबंधेनान्वयस्य साकांक्षत्वाद्योग्यताभावमात्रं तथा प्रयो- त्वा
गस्य[illegible]वाद्। लभेताना योग्यताभ्रमात्तद्वानीतादृशप्रयोगस्यदुर्वारत्वादित्यपास्तं। तथा सत्याख्यातस्य धातुपर्याय- क्ते
त्वानुपपत्तेः। प्रवृत्तित्वस्य शक्यतावच्छेदकत्वेऽपि गुणविभाजकतावच्छेदकप्रयत्नत्वस्य जातित्वे मानाभावेन
प्रवृत्तित्वमपेक्ष्य तस्य गुरुत्वाच्च। न च प्रवृत्तित्वस्य शक्यतावच्छेदकत्वे चैत्रो निःश्वसितीत्यादौ कथं सोऽर्थोऽनुकूलयत्नानुभवः

तिवाच्यं। तत्र श्वासाश्रयत्वमात्रप्रतीतेः शरीरक्रियाविशेषस्य श्वासत्वात्। न च तथापि प्रवृत्तिविषयस्य शक्यतावच्छेदकत्वे
परमेश्वरो वेदमुच्चारय[illegible]तीश्वरो वेदं वक्तीत्यादौ कथं वेदाभिन्नशब्दानुकूलयत्नानुभवो वेति वाच्यं। कार्य
सामान्यं प्रति लघुतया च प्रवृत्तिविषयस्यैव जनकतावच्छेदकत्वेन भागवत यत्नेऽपि प्रवृत्तिविषयत्वस्य धर्मिग्राहकमानसिद्धत्वात्
यत्ना। तत्र वचादिधातोरेव प्रयत्नसामान्यमर्थः अनुकूलत्वं विषयत्वं वा कर्मविभक्त्यर्थ ४। आख्यातस्याश्रयत्वमर्थः। आ
ख्यातस्यैव वा यत्नसामान्ये लक्षणा। वचादिधातुश्च कण्ठाद्यभिघातपर एव। केचित्तु परमेश्वरपदं तदीयकण्ठादिपरं। वचादिधातोः कण्ठाद्य
भिघात एवार्थः आख्यातस्य चाश्रयत्वमर्थः। आख्यातस्यैव वा परंपरासंबंधेन विशेषणेनाश्रयत्वमर्थः। तथा च परमेश्वरपदं यथाश्रुतमेवेत्या
हुः। अत्र स्वशक्यप्रतिपादकताविशेषसंबंधेन कृधातुमत्त्वादिति हेतुरूह्यः। विशेषोपादानाद् आत्मादौ न व्यभिचारः। नन्वयं हेतुरसिद्ध इ
त्यत आह पचतीति। पचति पाकं करोतीत्यादिवाक्यमध्यवर्त्तिना यत्नार्थककरोतिना पत्नश्शत्ते कृधातुना सर्वाख्यातानां लक्षत्वादिति
पसकलाख्यातविभाजकतावच्छेदकधर्मावच्छिन्नानां विवरणात् स्वशक्यप्रतिपादकतासमाजेनेनादित्यर्थः। आदिपदात् पक्ष्यति पाकं क
रिष्यति अपचत् पाकमकरोत् इत्यादेः परिग्रहः। आदिपदाग्रहणे पाकं करोतीत्यत्र करोतिना पक्ष्यतीत्यादेरविवरणादसंगतत्वापत्तेः। अयं

भावः। पचति पाकं करोतीत्यादिषु विवरणेषु पचतिपदं स्वपरतया पचूपदपरं तिपूपदपरं पाकपदसमभिव्याहारेण कृधातुः पाकसमाना
र्थकत्वकृञ्समानार्थकत्वपरः आश्रयत्वमाख्यातार्थः एवं च पचूपदं कृपाकसमानार्थकं तिपदं कृञ्समानार्थकमित्यादिबोधः। एवं सर्व
त्रैव विवरणे चरमपदमेव तत्तत्पदसमभिव्याहारेण तत्तत्समानार्थकत्वे लक्षणा। अत एव येन स्वसमानार्थकतया तद्बोध्यते तत्तस्य विवरणमि
ति प्राचामालिकाः। ननु तथापि स्ववाक्यप्रतिपादकताविशेषसंबंधेन शक्त्या लक्षणया वा कृधातुर्वाक्यप्रतिपादकघटादिशब्देऽनैकान्ति
कत्वमित्यत आह व्यवहारादिवदिति। बाधकं विना स्वसाध्यस्य बाधकं यद्विशेषणं तदभाववत्ता विशेषणसहकारेण। व्युत्पत्तेः। व्युत्पत्ति
संभवादिति यावत्। गवादिव्यवहारे यथा गवादिपदशक्यत्वरूपस्वसाध्यस्य बाधकं यद्विशेषणं लक्षणाशक्तिभ्रमजन्यस्वजन्यप्रतिपत्ति
विषयतासंबंधेन गवादिव्यवहारवत्त्वम्। तदभाववत्त्वे सतीति विशेषणविशिष्टान्यप्रतिपादकतासंबंधेन गवादौ गवादिपदशक्तिसाध
कः तथा कृधात्वादिविवरणमपि प्रवृत्तित्वावच्छिन्नवाक्यताकत्वादिरूपस्वसाध्यस्य बाधकं यद्विशेषणं लक्षणाशक्तिभ्रमजन्यस्ववाक्यप्र
तिपत्तिजनकतासंबंधेन कृधात्वादिमत्त्वम्। तदभाववत्त्वे सतीति विशेषणविशिष्टान्यस्ववाक्यप्रतिपादकतासंबंधेन प्रवृत्त्यादावा
ख्यातादेः शक्तिसाधकमित्यर्थः। किंतु बाधकाभाववत्त्वं हेतोर्विशेषणमिति भावः। अत एव शक्तिग्रहं व्याकरणोपमानकोशाप्तवा

३ कैयाद्यवहारतश्च्वाभाक्यस्यदोषाद्धिरत्नेर्वदंतिसांनिध्यतः।सिद्धपदस्यवक्ता।अत्रानुमानपदंव्यवहारादीभरालिंगकानुमानपरम्॥
तिनव्यवहारादिदर्शनादेनत्पयगुपादानताविरोधः।सांप्रदायिकास्तु।नन्वाख्यातस्यकिंशक्यमित्यत आह आख्यातस्येति।प
ने आख्यातवाच्यत्वातयथाश्रुतएवार्थः।ननुतस्याख्यातवाच्यत्वे।किंमानमित्यत आह पचतीति।करोतिनेति। अभेदेनजी
या॰ अन्वयश्च विवरणे विवरणंस्वसमानार्थकत्वज्ञापनम् ज्ञानानुकूलः शब्दः प्रमाप्यत्वं पंचम्यर्थः।तथाच विव
रणमेवमानमितिभावः।ननुविवरणस्यशक्तिप्रमापकत्वंनशब्दविधया शक्तेः पदार्थत्ववाक्यार्थत्वयोरभावादा
ह व्यवहारादिवदिति। तथाचानुमानविधयैवतस्यशक्तिसाधकत्वमितिभावः। अनुमानंचोक्तरूपमितिव्याचख्युः।न
नु विवरणेनकृधातुशक्यप्रतिपादकत्वंतिबादेर्नबोधितमपिकृधातुप्रतिपाद्यप्रतिपादकत्वम्। तच्चोक्तंस्थलेयागकृधातोः प्रति
पाद्यस्यव्यापारादेः प्रतिपादकत्वेनापिनिर्वहतीत्यस्वरसेनाह किंकरोतीति। किंविषयकत्वप्रकारकप्रवृत्तित्वविशिष्ट
विशेष्यकप्रश्नेसतीत्यर्थः। किंविषयकत्वंजिज्ञासितविषयकत्वं। किंशब्दस्यजिज्ञासितविषयकत्वात्। यत्नार्थकत्वं
विना। आख्यातस्यप्रवृत्तित्वविशिष्टार्थकत्वंविनाऽनुपपत्तेरिति। जिज्ञासानिवर्तकत्वानुपपत्तेरिति। यद्रूपविशि ३

ष्टविशेष्ये जिज्ञासितस्य यः संबंधः प्रश्नवाक्येन बोध्यते तद्रूपविशिष्टविशेष्ये तत्संबंधज्ञानेनैव जिज्ञासानि
वृत्तेरिति भावः। तथा चाख्यातं प्रवृत्तित्वावछिन्नशक्यताकं प्रवृत्तित्वविशिष्टे जिज्ञासाया निवर्त्तकस्य
ज्ञानस्य जनकत्वादित्यनुमानप्रकारोऽस्येयः। अत्रापि जहल्लक्षणा[redacted]शक्तिभ्रमाद्यजन्यत्वेन ज्ञानं विशे
षणीयम्। तेन लक्षणादिना प्रवृत्तिबोधके शब्दे न व्यभिचारः। न च लक्षणाशक्तिभ्रमाद्यजन्यप्र
वृत्तित्वविशिष्टविषयकत्वादित्येवास्त्विति वाच्यम्। हेत्वन्तरस्येह तन्त्रतादूषकत्वादिति निगर्वः। ननु पूर्वहेतो
र्निरुक्तबाधकाभाववत्त्वविशेषणमत्र तु लक्षणाशक्तिभ्रमाद्यजन्यत्वं ज्ञानविशेषणमसिद्धम्। प्रवृ
त्तित्वस्याख्यातशक्यतावच्छेदकत्वे रथो गच्छतीत्यादिवाक्यस्यायोग्यतापत्त्याऽनुकूलव्यापारो ह्यवेया
ख्यातस्य शक्तिः। रथादेरचेतनत्वात् तत्पाचेतन्याद्यनवच्छेदकतया च तत्र प्रवृत्तिमत्त्वासंभवात्। अपच त्यपि चै
त्रादौ कालिकादिप्रत्यासंबंधेन प्रवृत्तिमादाय चैत्रः पचतीति व्यवहारवारणाय समवायावच्छेद

कत्वान्यतरसंबंधेनैव कर्त्तृपदार्थेऽआख्यातपदार्थयत्नान्वयस्य साकांक्षत्वमित्यस्याभ्युपेयत्वात्। आत्मा
पचतीत्यादिप्रयोगानभ्युपगमे समवायो विनान्तर्भावनीयः। परमेश्वरो वेदं कर्त्तेत्यादौ परमेश्वरपदस्य तच्छ
५ रीरपरत्वएव योग्यत्वं न तु परमात्मपरत्व इति चाकामेनस्वीकरणीयमित्याशंका प्राचीनमतमाश्रित्य परिहर
ति अचेतन इत्यादिना। अचेतने अचेतनविशेष्यकाख्यातार्थप्रकारकान्वयबुद्धिजनकेऽचेतनत्वे
समवायावच्छेदकत्वान्यतरसंबंधेन चैतन्यवतो भिन्नत्वं। तेन चैत्रः पचतीत्यादेर्नासंग्रहः। तण्डुलः प
च्यत इत्यादेर्व्यवच्छेदाय ...र योगाच्छूतीत्यादाविति। तेन कर्त्तृविहिताख्यातइति लभ्यते। अनुकूलत्व
स्य धात्वर्थआख्यातार्थव्यापारयोः संबंधता इति स्फोरणायानुकूलत्वेनोपादानं न तु लक्ष्यतावच्छेदके
तदन्तर्भावः। व्यापारत्वं च कार्यत्वं। तच्च प्रतियोगितासंबंधेन ध्वंसवत्त्वं [illegible] ध्वंसत्वं वा व्यापारत्वं। व्यापारे निरू
ढलक्षणामतं दूषयन्मतांतरमाह अन्यदीयेत्यादिना। न व्याहन्यत इत्यन्तेन। अन्यदीयतत्तु यथाहि निष्ठत्वं। नोदनादि ४

मतीति। निश्चलत्व इति शेषः। आदिपदादभिघाताद्यदृष्टवदात्मसंयोगादिपरिग्रहः। अप्रयोगादित्यादेः
पंचम्यंतत्रयस्याश्रयत्वे निरूढलक्षणोत्थानेनेत्यनेनान्वयः। तत्र विशिष्टनिरूपिताधारतासंबंधेनैवकर्तृपदा
र्थे गमनव्यापारान्वयसाकांक्षत्वात् गमनविशिष्टव्यापारान्वयस्य च निश्चले विरहान्नातिप्रसंग
इत्यत आह जानातीत्यादि। तथा चावश्यकल्पनीयाश्रयत्वे निरूढलक्षणयैवोपपत्तौ नानुकूल
व्यापारे निरूढलक्षणा कल्प्यत इति भावः। अत्र च चक्षुर्जानातीत्यादौ व्यापारस्यापि प्रत्ययाभ्यु
क्तमिष्टमिति। योगश्चाक्षुर्लक्षणेच्छायातदनुकूलप्रवृत्तेरपि प्रत्ययादुक्तं पतत इवीति
यत्नद्वेषयोस्तु प्रवृत्तिजन्यत्वमसम्भाव्येवेति भावः॥ उक्तप्रवृत्तिव्यापारयोरप्रतीतावे
पि आत्ममनोयोगादिरूपो व्यापार आत्मनि संभाव्येव। अतिप्रसंगनिरा● सोपि धा

त्वर्थविशिष्टनिरूपिताधारत्वस्य संबंधत्वानियमात्युपगमाद्वसंभवतीत्यनुशयेनो
क्तं विघटितनिद्रातीति। विदेः कालसंबंधित्वमर्थः। तदनुकूलैककृतिव्यापारयोग्यत्वेन
घटादौ संभवः॥ एवं च निद्राव्यवनाडीविशेषावच्छेदेनात्ममनःसंयोगो निद्रा॥
5 मिद्धात्वं [illegible]च पुरीतति त्वव्यापकोऽज्ञाति विशेषः। तेन सुषुप्तिदशायां निद्रातीति
प्रयोगो नानुपपन्नः॥ तादृशनिद्राश्रयत्वव्यवहार आत्मनि मनोव्यापृत्तेः आ
त्मत्वविशिष्टसमवायसंबंधेन। शरीरे च समवायिसमवेतादृष्टारब्धत्वलक्षणपरं
परासंबंधेन। असाधारणे तदनुकूलताश्रयो व्यापारो न कश्चिदात्मनि संभवतीति भावः ५

वस्तुतस्तु । विघतेइत्यस्य पूर्वं निद्रातीतिपाठः ॥ निद्रा च मिडूाख्यनाडीविशेषमनःसंयोगः तदाश्रयत्वव्यवहारस्त्वात्म
निस्वसमवायिसमवेतशरीरारम्भकादृष्टवत्त्वरूपेण स्वसमवाय्यारम्भकादृष्टवत्त्वरूपेण वा परंपरासंबंधेन शरीरे च
स्वसमवायिसमवेतद्रव्यत्वलक्षणेन परंपरासंबंधेनासाधारणतदनुकूलतदाश्रयव्यापारो न कश्चिदात्मनि संभ
वतीति भावः ॥ यथा स्वसमवायिसमवेतशरीरारंभकादृष्टवत्त्वादिरूपपरंपरासंबंधेन तादृशनिद्राश्रयत्वमात्मन
स्तथा तदनुकूलव्यापारस्य नाडीक्रियादेरप्यात्मनि तेन संबंधेन सत्त्वसंभवादुक्तं विघतेइति । कालसंबंधित्वरूपविघ
मानत्वस्य चानुकूलो व्यापारो न कश्चिद्घटादौ संभवतीति भावः ॥ यत्तु विदेः सत्तार्थकतया तदनुकूलव्यापार एवाविद्य
त्यर्थ इति तन्न । सत्ताजातेस्तदर्थत्वे अविघतइत्यादौ लङि अतीतत्वाद्यनन्वयापत्तेः ॥ ननु जानातीत्यादावाश्रयत्व
स्य वरयोगाच्छतीत्यादौ गमनानुकूलव्यापारत्वस्यापि प्रत्यया तत्रापि निरूढलक्षणापत्तिर्दुर्वारैवेत्यत आह गत्यादी
ति । रथो गच्छतीत्यादौ गत्याश्रयत्वे मात्रप्रतीतेरित्यर्थः । आदिपदाद्धटो जानातीत्यादौ गत्यादेः परिग्रहः ॥ ननु पूर्वोक्ते

षु जानातीत्यादिषु ज्ञानादेः परिग्रहः मात्रांशस्यापुनरुक्तत्वापत्तेः अत्र जानातीत्यस्य पूर्वं रथो गच्छतीति पाठः प्रामादिकः । केचित्तु
त्र मात्रपदरहितः पाठः जानातीत्यस्य पूर्वं रथो गच्छतीत्यादिपाठः तत्र रथो गच्छति जानातीत्यादौ धात्वर्थानुकूलकृतिव्यापा
रयोरप्रतीतावपि आश्रयत्वस्याप्रतीत्या न तत्र लक्षणासंभव इत्यत उक्तं गत्यादीति । आदिना ज्ञानादिपरिग्रह इति ध्येयम्
आश्रयत्वद्रत्यत्र निरूढलक्षणे यमेतनेनान्वयः । ज्ञानादीनां चानुकूल्यमाश्रयत्वं समवायेनावच्छेदकतया चावबोध्यम् ।
तेनात्मनि चैत्रादिशरीरे च जानातीत्यादिप्रयोगोपपत्तिः ॥ न वा घटादौ जानातीत्यादिप्रयोगापत्तिः । गत्यादेराश्रय
त्वं च समवायेन बोध्यते । तेन यथाकथंचित्संबंधेनाश्रयत्वमादायनातिप्रसंगः । न चैवमात्मा गच्छतीत्यादिप्रयोगो न
स्यादिति वाच्यम् । इष्टत्वात् । अहं गच्छामि त्वं गच्छसीत्यादौ तु उच्चारयित्रादिशरीरस्यैव चैत्रत्वादिरूपेणास्मदादिपद
वाच्यतया नान्वयानुपपत्तिः । अत एवात्मा पचतीत्यादिप्रयोगवारणायावच्छेदकतासंबंधेन कर्तृपदार्थे आख्या
त[illegible]पदार्थ[illegible]यत्नान्वयस्य साकांक्षत्ववादिनये त्वं पच[illegible]सि अहं पचामीत्यादौ नान्वयानुपपत्तिः उच्चारयित्रादिश
रीरस्य च चैत्रत्वादिरूपेण युष्मदस्मदादिशब्दवाच्यतयावच्छेदकतासंबंधेन व[illegible]प्रवृत्तेस्तत्रान्वयासंभवादिति

६

ध्येयम्। ननु तथाप्यनुकूलव्यापारे निरूढलक्षणावश्यकी। घटो नश्यतीत्यादौ घटादिषु वर्त्तमानोत्पत्तिक
नाशविशिष्टव्यापारवत्त्वप्रतीतेः। तादृशो व्यापारवत्ता च। नाशकतावच्छेदकसंबंधेन स्यात आह नश्यतीत्या
दाविति। तथैवानुभवादिति भावः। यद्यपि प्रतियोगितासंबंधेनाश्रयत्वमेवार्थस्तत्रापि संभवति आत्मानि
ष्ठातीत्यनुरोधेः नसंबंधितासाधारणाश्रयत्वस्यैव विवक्षणीयत्वात् तथापि प्रतियोगित्वप्रकारेणैवा
नुभवस्य तत्र सर्वसिद्धत्वात्तत्परित्यागः। ननु रथो गच्छति चैत्रो जानातीत्यादौ नश्यतीत्यादौ च धात्वर्थक
र्त्तृपदार्थयोरन्वयसंसर्गमपरिहृत्यैवाश्रयत्वप्रतियोगित्वसंभवात् किं लक्षणाभ्युपगमेनाख्यातस्य तु य
थायथं वर्त्तमानत्वादिकं संख्या वार्थोऽस्त्वित्यत आह चैत्र इति। अन्वयानुरोधादिति। धात्वर्थे कर्मतासंबंधेन
तण्डुलस्य कर्त्तृतासंबंधेन मैत्रस्यान्वयाबोधात्॥ एवं धात्वर्थपाकस्य कर्त्तृतासंबंधेन चैत्रे कर्मतासंबंधे
न तण्डुलेऽन्वयाबोधाच्चेत्यर्थः॥ इदमुपलक्षणम्॥ ज्ञानं चैत्र इत्यादावाश्रयतासंबंधेन चैत्रादौ ज्ञानादेरन्वयाबोधाच्चे
त्यपि द्रष्टव्यम्॥ एतेन पचति तण्डुलमित्यादौ कर्मतासंबंधेन तण्डुलादेर्धात्वर्थपाकविशेष्यकान्वयबोधवारणाय धात्व

र्थस्य नामार्थविशेष्यकतयाऽन्वयबोधोऽव्युत्पन्नोस्तु ॥ प्रकृते च नामार्थकर्तृविशेषणतया गमादिधात्वर्थस्यान्वये
न किमपि बाधकमिति प्रत्युक्तम् ॥ स्तोकं पचतीत्यादौ नामार्थयोरभेदसंसर्गेणान्वयबोधदर्शनादुक्तं भेदेनेति । अभेदा
तिरिक्तसंबंधेनेत्यर्थः ॥ अभेदस्तादात्म्यं साक्षादन्वयस्य साक्षाच्छाब्दबोधस्याव्युत्पन्नतया । शाब्दाजन्यतया । ना
7 मार्थान्वितस्य विभक्त्यर्थस्य धात्वर्थे धात्वर्थान्वितविभक्त्यर्थनामार्थे बोधस्य शाब्दजन्यत्वादुक्तं साक्षादिति । तद्भि
न्नेति । आश्रयत्वप्रतियोगित्वयोर्भानेत्यर्थः । तत्र प्रातिपदिकमव्ययातिरिक्तत्वेन विशेष्यम् तेन न कलञ्जं भक्षयेदि
त्यत्र न्यायनये नञर्थस्य विशेषणतावि(?)शेष्येण धात्वर्थेनान्वयो गुरुनयेऽनुयोगितासंबंधेन धात्वर्थस्य नञर्थे
नानुपपन्नः ॥ अत एव ज्ञानवद्दिष्टत्यादौ वपिवत्यर्थस्य धात्वर्थे नान्वयः । प्रतियोगितया साक्षादन्वयो नानु
पपन्नः । न चाभेदातिरिक्तसंबंधेन पाकज्ञानादिप्रकारकचैत्रादिविशेष्यकशाब्दबोधः पचति चैत्रो ज्ञानं चैत्रस्
त्यादिवाक्याद्योग्यताज्ञानसत्त्वेपि कुतो न जायते सति कारणे कार्यानुत्पादस्यासंभवादिति वा
च्यम् ॥ यादृशयादृशानुपूर्वीतस्तादृशान्वयबोधोऽनुभवसिद्धस्तत्तदानुपूर्व्यास्तत्र हेतुतया यावद्विशेषका ८

रणाविरहादेवनतस्त इत्यनुसाधात्। केचित्तु धात्वर्थनिष्ठविषयतानिरूपिततादात्म्यातिरिक्तसंबन्धावच्छिन्ननिपातातिरिक्तपदा
र्थनिष्ठविषयतासंबन्धे नञादिबोधं प्रति धातूत्तरप्रत्ययजन्योपस्थितिर्विशेष्यतासंबंधेन कारणं। येन तादृशविषयतानिरू
पितोक्तसंबंधावच्छिन्ननामार्थनिष्ठविषयतासंबंधेन शाब्दबोधं प्रति निपातजन्योपस्थितिर्विशेष्यतासंबंधे कारणमतो न त
स्मात्तादृशशाब्दबोध इत्याहुः। तदसत्। धात्वर्थनामार्थयोरनुगतानतिप्रसक्तयोर्दुर्वचत्वादिति ध्येयं। करोतेः प्रवृत्तिवाचकत्वे
एवकृञ्धातुः शक्यप्रतिपादकत्वे नप्रवृत्तित्वविशिष्टविशेष्यक जिज्ञासानिवर्तकज्ञानजनकत्वेन वा हेतुना आख्यातस्य त
द्वाचकत्वं सिध्यति। तस्य क्रियादिवाचकत्वे क्रियादावेव प्रथमहेतोर्व्यभिचारात्। द्वितीयहेतोः किं करोतीति प्रश्नस्य यत्नवि
षयकत्वासिद्धापत्ता वृत्तित्वासिद्धेरतः कृञोपि प्रवृत्ति[redacted]वाचकत्वमाचार्योक्तयुक्तिभ्यां व्यवस्थापयति। कृञश्चे
ति। यत्नाभिधायकत्वं प्रवृत्तित्वविशिष्टवाचकत्वं। नन्विदमसिद्धं क्रियाया एव तच्छक्यत्वात्। पाकं करोतीत्यादौ च स्तो
कं पचतीत्यादाविवाभेदः संसर्गः पाकस्य। पाकौ करोति पाकान् करोति पाकः क्रियते इत्यादौ च कर्मविभक्तेरेवाभेदार्थ

इत्यत आह। क्रियेति। क्रियावयवसंयोगानुकूलः स्पंदः। यत्नजन्यत्वाजन्यत्वेति। यत्नजन्यत्वं यत्ननिरूपितफलोपधा
नात्मकं जन्यत्वसाध्यताख्यविषयतोभयसंबंधत्वं। यत्नाजन्यत्वं यत्ननिरूपिततादृशोभयसंबंधवद्भिन्नत्वं तादृशोभयवि
४ शिष्ट एव कृधातुसमभिव्याहृते तन्निष्ठाप्रत्ययेन बोध्यते। भ्रमाद्वहतस्य गुरुतरभारोत्तोलनादौ कृतव्यवहारवारणा
य फलोपधानात्मकजन्यत्वप्रवेशः। नांतरीयके कृतव्यवहारवारणाय साध्यताख्यविषयत्वप्रवेशः। अत एव नां
तरीयके मत्तोऽभूत् न तु मया कृतमिति व्यवहारः। व्यवहारं प्रति व्यवहर्तव्यज्ञानस्यैव हेतुत्वा[illegible]तिसंधानत्वप्र
वेशः। तथा च क्रियायाः कृत्यर्थत्वे क्रियाऽजन्यत्वस्यैव तादृशव्यवहारविषयतावच्छेदकतया तज्जन्यत्वप्रति
संधानदशायां निरुक्तयत्नाजन्यत्वप्रतिसंधानाद कृतव्यवहारानापत्तिरिति भावः। इदमुपलक्षणं। नांत शिवः
रीयकेपि मया कृतमिति व्यवहारप्रसंगात्। मया न कृतमिति व्यवहाराप्रसंगाच्चेति ध्येयं। आचार्योक्तां प्र
थमां युक्तिमभिधाय तदुक्तां द्वितीयां युक्तिमाह। ज्ञात्रादिवदिति। ज्ञातृपर्शादिवदित्यर्थः। आश्रयपरेति। तथा ८

चतच: कृतिमति शक्तावपि सविषयक धातूक्तरस्य तस्याश्रयेण निरूढलक्षणा। अन्यथा कर्त्तेत्यत्र कृतिकर्तृत्वान्वयः स्यात् स चायो
ग्य इति भावः। नन्विदमेवास्तु किंतु कर्त्तृपदे क्रियाश्रयबोधकं अनुकूलव्यापाराश्रयबोधकं वेत्यत आह। क्रियाया इति
क्रियासंबन्धः। अनुकूलव्यापारस्येति पाठः। तदनुकूलव्यापारस्येति पाठः प्रामादिकः। तत्पदेन। क्रियानुकूलत्वे घटं क
रोति घटस्य कर्तृत्वादोस्यत्तदनुकूलव्यापारस्य कृत्यर्थत्वानभ्युपगमादसंगतेः। पाकं करोतीत्यादिस्थले न विशेषा। नि
प्रायेण तदभिधानमतस्तादृशपाठेऽपि न दोष इत्यपि केचित्। प्रथमे दूषणमाह। नदाश्रय इति। क्रियाश्रयेत्यर्थः।
तथा च तण्डुलः पाककर्त्तेत्याद्यपि व्यवहारः स्यादिति भावः। द्वितीये दूषणमाह॥ कारकमात्रमेवेति। स्थाली काष्ठ
तण्डुलादेरपि पाकानुकूलसंयोगादिमत्त्वात्तत्र इव तत्रापि कर्त्तृव्यवहारः स्यादिति भावः। कृञ्धातोराख्यातस्
स्य च जनकव्यापारत्वमेव शक्यतावच्छेदकमिति केचित् वदन्ति तन्मतमाशंकते अथेति। रथो गच्छति गमनं करोतीति
तथा च तद्विवरणबलाद्यत्नो न कृञर्थः किन्तु जनकव्यापार एव तदर्थः। रथो गमनं करोतीत्यादौ कर्मविभक्तेर्निरू
पितत्वमर्थः। कृञर्थैकदेशे जनकत्वे च तदन्वयः। आख्यातस्याश्रयत्वमर्थः। गमनविशिष्टव्यापाराश्रयत्वं निरू